# व्याकरणशास्त्रे शास्त्रासिद्धत्व–कार्यासिद्धत्वमीमांसा

**योगराजकण्डेलः**

*उपप्राध्यापकः, नेपालसंस्कृतविश्वविद्यालयः, शारदाविद्यापीठम्*

yograj.kandel@nsu.edu.np

Orcid : https://orcid.org/0009-0006-6907-3197

https://doi.org/10.3126/anveshana.v4i1.96921

**लेखसारः**

*व्याकरणशास्त्रपरम्परायामष्टाध्याय्याः महत्त्वपूर्णं स्थानं विद्यते। महेश्वरप्रसादाल्लब्धानि 'अइउण्' इत्यादीनि चतुर्दशसूत्राण्याधृत्य भगवता पाणिनिना प्रत्याहारनिर्माणमाध्यमेन सम्पूर्णसूत्राणां क्रमबद्धसंयोजनं विधाय अष्टाध्यायीग्रन्थो निर्मितः। अष्टाध्यायीग्रन्थे च विद्यमानेषु सूत्रेष्वन्यतमं सूत्रमस्ति पूर्वत्रासिद्धमिति। तेनैव सूत्रेण व्याकरणशास्त्रपरम्परायां सिद्धासिद्धत्वपक्षयोः सैद्धान्तिकस्वरूपं प्रस्तुतम्। संज्ञापरिभाषादिषड्विधसूत्रेषु एतदधिकारसूत्रमस्ति। यद्यप्यस्य सूत्रस्य विधित्वाधिकारत्वविषये विवादो दृश्यते तथापि अस्य अधिकारत्वेवाङ्गीक्रियते। यदि विधिसूत्रत्वमेवाङ्गीक्रियते तर्हि सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा भवति इत्येवार्थो भवति न तु त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यादिति इत्यर्थो लभ्यते। तथा सति त्रिपाद्यामस्य नियमस्याप्रवृत्या गोधुङ्क्षान् इत्यादिप्रयोगाः नैव सम्भवन्ति। अधिकारत्वं नाम उत्तरोत्तरसम्बन्धः। एवञ्चास्य सूत्रस्य त्रैपाद्यां विद्यमानेषु सर्वेषु सूत्रेषु सम्बन्धो भवति। पूर्वत्र, असिद्धमिति पदद्वयस्य जायते चानुवृत्तिः। एवं सर्वत्र एकवाक्यतया भवति शाब्दबोध इति। तेन त्रिपाद्यामपि पूर्वशास्त्रं प्रति परशास्त्रमसिद्धं भवतीत्यर्थलाभो भवति। अस्यार्थस्तु 'सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा, त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धम् स्यादिति। पूर्वशास्त्रदृष्ट्या परशास्त्राणामसिद्धत्वारोपं करोति। वस्तुतस्तु पूर्वत्रासिद्धमिति सूत्रमाहार्यारोपमेव विधत्ते। बाधकालीनेच्छाजन्यं ज्ञानमाहार्यज्ञानमिति। यथा रजतत्वाभाववतीं शुक्तिं रजतत्वेन जानीयामिति बाधसमकालिकेच्छाजन्यमिदं रजतमिति ज्ञानमाहार्यज्ञानम्। तच्चाहार्यज्ञानञ्च न हि प्रवर्तकं भवति न वा निर्वर्तकं भवति। यद्यपि लोके दृश्यते प्रवृत्तिनिवृत्ती प्रति अनाहार्यानारोपितज्ञानयोरेव कारणत्वं भवति। आहार्यारोपस्य कारणत्वं नैव भवति। तथाप्यत्र व्याकरणशास्त्रे पूर्वत्रासिद्धमिति शास्त्रप्रामाण्याद् आहार्यारोपज्ञानमपि शास्त्रप्रवृत्तौ निवृत्तौ च कारणं भवति। तेनैव "अ अ" इति सूत्रेण विहितस्य संवृतस्य विवृतत्वबुद्ध्या "अकः सवर्णे दीर्घः" इति सूत्रेण दण्डाढकमित्यादौ दीर्घो भवत्येव। 'यद्यपि वर्णाः अचेतनाः यस्त्वसौ प्रयुङ्क्ते स चेतनावान् इति महाभाष्यकारस्याशयो विद्यते अतः व्याकरणशास्त्रप्रक्रियानिर्वाहाय शास्त्रेषु चेतनत्वमारोप्य दृश्यदर्शकभावत्वं स्वीकरोति। शास्त्राण्यचेतनानि किन्तु शास्त्रप्रवर्तकस्तु चेतनः। स एव पूर्वशास्त्रं प्रवर्तयिष्यति परशास्त्रञ्चासिद्धवत् करिष्यति। तेन व्याकरणशास्त्रे अष्टाध्यायीस्थसूत्राणां व्यवस्थापनाय*

*पूर्वत्रासिद्धमिति सूत्रस्य ज्ञान्, अर्थापनम्, सिद्धान्तोपस्थापनञ्चातीवावश्यकं परिभाव्य एतत्सूत्रमधिकृत्य व्याख्यानमत्र उपन्यस्तम्। व्याकरणमहाभाष्य–लघुशब्देन्दुशेखर–प्रौढमनोरमादिग्रन्थानां, तट्टीकाग्रन्थानाञ्च सम्यक् पर्यालोचनं विधाय सूत्रे विद्यमानस्य शास्त्रासिद्धत्व–कार्यासिद्धत्वयोर्मध्ये भाष्यसम्मतशास्त्रासिद्धत्वपक्षस्योपन्यासोऽत्र विहितः। तथा च सूत्रविषये समागतानामानुषङ्गिकविषयाणामपि शास्त्रसम्मतं व्याख्यानमत्र कृतमस्ति।*

**शब्दकुञ्जी -** आहार्यज्ञानम्, चक्रकापत्तिः, लक्षणावृत्तिः, विप्रतिषेधः,सप्ताध्यायी

## विषयपरिचयः

संस्कृतव्याकरणशास्त्रपरम्परायामैन्द्रचान्द्रकाशकृत्स्नापिशलादिप्रामुख्यम्भजमानेषु व्याकरणेषु साङ्गोपाङ्गं नवीनमभूतपूर्वञ्च पाणिनीयव्याकरणमेवेति न विप्रतिपत्तिः। प्राचीनवैयाकरणनिकाये समग्रशब्दजालस्य व्युत्पत्तिसामर्थ्यमनवलोक्य भगवान् पाणिनिः लौकिकवैदिकोभयविधप्रयोगाणां साधनार्थं भगवतः महेश्वरप्रसादादाशीर्वादमवाप्य 'अष्टाध्यायी' नामकं ग्रन्थरत्नं रचयामास। महेश्वरप्रसादाल्लब्धानि 'अइउण्' इत्यादीनि सूत्राण्याधृत्यैव प्रत्याहारनिर्माणमाध्यमेन सम्पूर्णसूत्राणां क्रमबद्धसंयोजनमष्टाध्यायीग्रन्थे विहितमस्ति। तत्र च प्रायः चतुःसहस्राणि सूत्राणि विद्यन्ते। तेषु सूत्रेषु च परस्परं बाध्यबाधकभावो भवति। उत्सर्गापवादयोर्विषये अपवादशास्त्रस्यैव प्रवृत्तिर्भवति। 'असिद्धं बहिरङ्गमन्तरङ्गे' इति न्यायेनापि बहिरङ्गशास्त्राणामसिद्धत्वं सम्पादयति। तथैव 'पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः' इत्यादयोऽपि पूर्वपरादिशास्त्रापेक्ष्यया नित्यान्तरङ्गापवादादीनां शास्त्राणामसिद्धत्वमेवारोपयन्ति। असिद्धत्वप्रकरणविषये बहुधा चर्चा तु व्याकरणशास्त्रपरम्परायां विद्यते एव। पातञ्जलमहाभाष्ये पूर्वत्रासिद्धमिति सूत्रस्य व्याख्यानसन्दर्भे शास्त्रासिद्धत्व–कार्यासिद्धत्वयोर्मध्ये शास्त्रासिद्धत्वपक्षस्यैव सैद्धान्तिकस्वरूपं प्रदत्तम्। एवमेव तदेव सैद्धान्तिकस्वरूपं स्वीकृत्य अन्येऽपि आचार्याः स्व–स्वग्रन्थेषु व्याख्यानमकुर्वन् । अस्य मूलं तु पूर्वत्रासिद्धमिति पाणिनीयसूत्रमेवास्ति। नागेशेन तथा च भट्टोजिदीक्षितेन च अस्य सूत्रस्य विषये स्व–स्वग्रन्थेषु बहुधा चर्चा कृता एव। तथैव पौरस्त्यपरम्परायां यथा अध्ययनस्य धारा अस्ति तथैव पाश्चात्यविद्वांसोऽअस्य विषये अध्ययनं तु कृतमेव। अत्र च केचन विदुषां शोधकार्याणि पूर्वकार्यत्वेनात्र द्रष्टुं शक्यते यथा–

सौम्या कृष्णपुरमहोदयया *Fundamentals of Asiddhatva in Paninian Grammar* (2021) इति शीर्षके स्वकीयशोधप्रबन्धे पाणिनीयव्याकरणपरम्पारायां विद्यमानस्य असिद्धत्वविषये अध्ययनं कृतमस्ति।

तथा च **जोशी-रानाडे महोदयेन** आई.आई.टी. बम्बे (IIT Bombay): इति संस्थाया भाषाविज्ञानम् तथा संस्कृतविभागाद् *Asiddha principle and Ābhīya Asiddhatva in computational linguistics,* (2020) नामके स्वकीयानुसन्धानपत्रे पाणिनीयव्याकरणस्य असिद्धसिद्धान्तस्य तथा च आभीय–असिद्धत्वस्य च भाषावैज्ञानिकदृष्ट्या अध्ययनं कृतमस्ति।

तथैव जे. ए. एफ. रुडबर्गेन नाम्ना अनुसन्धात्रा अपि *Dictionary of Paninian Grammatical Terminology* (2008) इत्यात्मके स्वकीये शोधपत्रे पाणिनीयव्याकरणपरम्परायां विद्यमानस्य असिद्धत्वविषये व्याख्यानं प्रस्तुतमस्ति।

एवमेव माल्गोरजाता सुलिच महोदयेन **पोल्याण्डदेशस्य जाजिलोनियन–विश्वविद्यालये** *Asiddha vs asiddhavat in Patanjali's Mahabhasya (2015)* नामकं शोधपत्रं प्रस्तुतम्। तत्र च पातञ्जलमहाभाष्ये विद्यमानस्य असिद्धत्व–असिद्धवदित्यादिविषयेषु व्याख्यानं विहितमस्ति। तथैव अन्येष्वपि विविधेषु विश्वविद्यालयेषु अस्मिन् विषये अनुसन्धानं विद्वद्भिः विहितमेव तथापि शास्त्रासिद्धत्व–कार्यासिद्धत्वविषये तु नैव केनापि विदुषा तथा अध्ययनं विहितमतः अस्य अवश्यकतां परिभाव्य कृतमस्ति एतदध्ययनम्। एवमेव अत्र च "पूर्वत्रासिद्धम्" इति सूत्रस्य परिचयः, सूत्रार्थस्य निर्वचनम्, तुल्यबलविरोधस्य उपस्थापनञ्च विधाय सूत्रे विद्यमानानां पदानां व्युत्पत्तिप्रतिपादनपूर्वकं शब्दशास्त्रसम्बद्धयोः शास्त्रासिद्धत्व–कार्यासिद्धत्वयोर्मध्ये पार्थक्यप्रदर्शनपूर्वकं विवेचनं विहितमस्ति। शेखरमनोरमादिग्रन्थानुसारं दीक्षितनागेशयोः मते सूत्रस्यास्य व्याख्यानावसरे यन्मतवैविध्यं वर्तते तस्य विवेचनम्, विश्लेषणं विधाय शब्दशास्त्रानुरूपं शास्त्रासिद्धत्वपक्षस्य सिद्धान्तानुशीलनमेवास्यानुसन्धानात्मकलेखस्य मूलं क्षेत्रं सीमा च वर्तते। पूर्वत्रासिद्धमिति सूत्रञ्च अष्टाध्याय्याः अष्टमाध्यायस्य द्वितीयपादस्य प्रथमं सूत्रमस्ति। अस्मिन् व्यकरणशास्त्रे च "पूर्वत्रासिद्धम्" इत्यतः पूर्वसूत्रसमुदायः सपादसप्ताध्यायीपदेन व्यवह्रियते। अतः परसूत्रसमुदायत्रिपादीपदेन च व्यपदिश्यते। संज्ञा–विधि–नियम–अतिदेश–अधिकार–परिभाषादिषु षड्विधेषु सूत्रेषु मध्ये एतत्सूत्रमधिकारसूत्रमस्ति। यद्यपि अस्य सूत्रस्य विधिसूत्रत्वमपि स्यादिति वदन्ति केचन। तथापि दृढतरशास्त्रप्रामाण्येनास्याधिकारत्वमेवाङ्गीक्रियते। अधिकारत्वं विना अस्य त्रैपाद्यामप्रवृत्या सूत्रस्थपदद्वयस्य स्वरितत्वप्रतिज्ञाबलेनास्य अधिकारत्वं सर्वैः स्वीकृतमिति। जायते चानुवृत्तित्रिपाद्यामपि तथा च भवति च त्रिपाद्यामपि पूर्वशास्त्रदृष्ट्या परशास्त्राणामसिद्धत्वमिति। तेन अनड्वान् इत्यादिप्रयोगाणां सिद्धिर्जायते।

एतावता सपादसप्ताध्यायीस्थसूत्रदृष्ट्या त्रिपादिसूत्राणामसिद्धत्वमेव तथा च त्रिपाद्यामपि पूर्वस्मिन् कर्तव्ये परं शास्त्रमसिद्धं भवतीति सूत्रार्थः। सपादसप्ताध्याय्यामपि तुल्यबलविरोधे सति परं कार्यमेव विधीयते। तथैव पूर्वशास्त्रं प्रति परशास्त्रमेव भवत्यसिद्धम् न तु पूर्वशास्त्रविहितकार्यं प्रति परशास्त्रविहतं कार्यमिति। एतत्सर्वं पूर्वाचार्याणां पर्यालोचनपूर्वकं समीक्षणमत्रानुसन्धानपत्रे विहितमस्ति। अस्य सूत्रस्य विशदरूपेणव्याख्यानं विधाय शास्त्रासिद्धत्वपक्षस्योपस्थापनमत्र सिद्धान्तरूपेण प्रतिपादितम्। एवमेव चानुषङ्गिकत्वेन समुपस्थितानां शास्त्रीयविषयाणामपि व्याकरणशास्त्रानुरूपं व्याख्यानं विवेचनमप्यत्र विहितमस्ति। द्वयोः पक्षयोर्मध्ये शास्त्रासिद्धत्वपक्षस्यैव शास्त्रीयोपस्थानं विधाय सोदाहरणं शेखरमनोरमादिग्रन्थानुसारं परिशीलनं तथा च भाष्यसम्मतं सूत्राभिमतरहस्योद्घाटनञ्चस्यानुसन्धानस्योद्देश्यं वर्तते।

## अध्ययनविधिः

शब्दशास्त्रपरम्परायां विद्यमानस्य "पूर्वत्रासिद्ध्" इति सूत्रसम्बद्धस्य शास्त्रासिद्धत्व–कार्यासिद्धत्वपक्षयोः समीक्षणमत्र निगमनात्मकशैल्या कृतमस्ति। तथा च पातञ्जलमहाभाष्यम्, प्रौढमनोरमा–लघुशब्देन्दुशेखरग्रन्थौ, तदभिमतप्रतिपादकाः टीकाग्रन्थाश्च प्रमुखसामग्रीत्वेन प्रयुक्ताः विद्यन्ते। पुस्तकालस्य परिभ्रमणम्, अध्ययनमध्यापनम्, शास्त्रार्थः, विदुषां व्याख्यानादिकं श्रुत्वा च अस्य लेखस्य समग्रीसङ्कलनं विहितमस्ति तथा चानुसन्धानेऽस्मिन् हिन्दीनेपाल्यादिभाषायां लिखिता अनूदिताश्च व्याकरणशास्त्रसम्बद्धा सूत्रार्थप्रतिपादकाः ग्रन्था अपि द्वितीयसामग्रीत्वेन गृहीतास्सन्ति।

## सैद्धान्तिकपर्याधारः

शब्दशास्त्रस्येतिहासालोडने कृते सर्वेषु व्याकरणेषु साङ्गं रत्नायमानं पाणिनीयव्याकरणमेवेति निश्चप्रचम्। लौकिकवैदिकोभयविधप्रयोगाणां साधनार्थं भगवता पाणिनिना 'अष्टाध्यायी' नामको ग्रन्थः भगवतः शङ्करस्य प्रसादात् प्रणीतः। ग्रन्थोऽयं गीर्वाणवाण्याः प्राचीनेषु अर्वाचीनेषु च वाङ्मयेषु सूर्य इव प्रकाशमानो विराजते। 'अष्टाध्यायी' च सर्वाङ्गपूर्णा कृतिरस्ति। पाणिनेरष्टाध्याय्यां चतुःसहस्रसूत्राणि सन्ति, तथा चेयम् अष्टसु अध्यायेषु विभक्ताऽस्ति। यत्र च प्रत्येकं चत्वारः पादास्सन्ति। पाणिनेः शिष्यश्च कात्यायनो वररुचिरासीत्। तेन च पाणिनीयसूत्राणां न्यूनतातिरिक्तानां विषयाणां समाधानार्थं वार्तिकानि प्रणितानि। अत्रैव परम्परायाञ्च पाणिनीयसूत्राणामाधारीकृत्य उत्कृष्टा व्यवहारोपयोगिनी व्याख्या च भगवता पतञ्जलिना कृता सा च संस्कृतजगति 'महाभाष्य' नाम्ना व्यपदिश्यते। तत्र च पाणिनीयसूत्राणां प्रत्येकपदानां विवेचनं विहितमस्ति। वैयाकरणानां निकाये सूत्रवार्तिकभाष्येषु परस्परविरोधे महाभाष्यमेव प्रामाणिकं मन्यन्ते। उक्तञ्च 'यथोत्तरं मुनीनां प्रामाण्यम्' इति। अत्र च शास्त्रे पाणिनिसूत्रविषये यत्र वार्तिककृता काचिद् विप्रतिपत्तिः प्रदर्शिता, उपसंख्यानादिकं च कृतम् तत्र तस्यैव वचनं ग्राह्यमिति। यत्र च वार्तिककृद्वचनानि खण्डयित्वा भाष्यकारेण कश्चन प्रयोगः समर्पितः वार्तिकं वा प्रत्याख्यातं तत्र तत्र च तद्वचनमेवानुसृत्य प्रयोगाणां साधुत्वमनुसन्धेयमिति शास्त्री, २०५५, पृ. ८१) । भाष्यवार्तिककारयोः पर्यालोचनया प्रतीयते यत् वार्तिककारः सूत्रकृतो न्यूनताप्रदर्शनमेवाभिलक्ष्य वार्तिककरणे प्रवृत्तः, भाष्यकारस्तु सूत्रकृतो गौरवरक्षार्थमेव प्रवर्तते। अत एव भाष्यकारेणैव "वृद्धिरादैच्" इति सूत्रस्य भाष्ये एव उक्तम् – "प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म, तत्राऽशक्यं वर्णेनाऽप्यनर्थकेन भवितुम्, किं पुनरियता (त्रिपाठी, २०७३, पृ. ३०९)। एतावता शब्दशास्त्रपरम्पारायां यथा भगवतः पाणिनेः योगदानं विद्यते तथैव आचार्यकात्यायानस्य महाभाष्यकारपतञ्जलेश्च योगदानमपि तथैवास्ति। अत्र च एतेषां मुनित्रयाणां मतानामालोचनं विधाय शब्दशास्त्रपरम्परायां विद्यमानस्य शास्त्रासिद्धत्व–कार्यासिद्धत्वपक्षयोः समीक्षणं विहितमस्ति। तथा च अनयोः पक्षयोरुपस्थापनाय महाभाष्यकारस्य सिद्धान्तानां समीक्षणं तस्य टीकाकाराणामपि मतानाञ्च परिशीलनमप्यत्र विहितमस्ति। पूर्वत्रासिद्धमिति सूत्रस्य चाधिकारत्व–विधित्वविषयेऽपि पक्षद्वयं विद्यते। तस्यापि

महाभाष्यानुरूपं व्याख्यानमत्र कृतमस्ति। एवमेव अन्ते च व्याकरणशास्त्रपरम्परायां विद्यमानस्य शास्त्रासिद्धत्वपक्षस्य सैद्धान्तिकरूपेण उपन्यासं विधाय पूर्वत्रासिद्धमित्यस्य च अधिकारसूत्रत्वमेव सम्पादितम्। अस्य मूलाधारश्च महाभाष्यमेव।

## विषयप्रतिपादनम्

भट्टोजिदीक्षितेन वैयाकरणसिद्धान्तकौमुद्यामस्य सूत्रस्य व्याख्यानावरे 'सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा, त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धम् स्यात्' इति वृतावुक्तम् (शर्मा, सन् २०१२, पृ. ५)। अत्र च सूत्रे पूर्वत्रेति पदञ्च अधिकरणशक्तिप्रधानमव्ययम्, असिद्धमिति च प्रथमान्तमिति पदद्वयं विद्यते। पूर्वस्मिन्नित्यत्र च 'यस्य च भावेन भावलक्षणम्' इति सूत्रेण सप्तमी भवति, तथा च सप्तम्यर्थे 'सप्तम्यास्त्रल्' इति सूत्रेण त्रल्प्रत्ययो भवति। तथा चात्र तस्याधिकरणकारकत्वम्। कारकत्वं नाम च करोति क्रियां निर्वर्तयति, सम्पादयति, अन्वयति वा कारकमिति भाष्यकारेणोक्तम्। एवञ्च क्रियाजनकत्वं, क्रियान्वयित्वं वा कारकत्वमिति फलति। एतावता 'क्रियानिष्ठजन्यतानिरूपितजनकतावत्वं कारकत्वमिति' कारकस्यार्थो निष्पद्यते (उपाध्यायः, १९६६, पृ. ७७४)। सर्वेषां कारकाणाञ्च स्व–स्वावान्तरक्रियाद्वारा प्रधानक्रियानिष्पादकत्वमिति सर्वानुभवसिद्धम्। अत्रापि पूर्वस्मिन्निति कारकस्यापि कस्याञ्चित्क्रियायामन्वयोऽपेक्षितो भवति तेनात्र कर्तव्यमिति क्रियापदस्याध्याहारो विधीयते। तथैव पूर्वत्वस्यापि परत्वे नित्यसाकाङ्क्षतया परत्वस्यापि लाभो भवत्येव। अथवा पूर्वत्वपरत्वयोरवधौ नित्यसाकाङ्क्षतया कस्मात्पूर्वं कस्मात्परमित्याकाङ्क्षायाम् उपस्थिततत्वाद् पूर्वशब्देन परशब्दस्य लाभो भवतीति। तथा अस्माद् सूत्राद् पूर्वस्मिन् शास्त्रे कर्तव्ये अस्मात्परं शास्त्रमसिद्धं भवतीति पर्यवसितः। कस्मात्पूर्वमित्यत्र प्रत्यासत्या अस्यैव सूत्रस्यावधित्वमङ्गीक्रियते। अस्मिन् व्याकरणशास्त्रे "पूर्वत्रासिद्धम्" इत्यतः पूर्वसूत्रसमुदायः सपादसप्ताध्यायीपदेन व्यवह्रियते। अतः परसूत्रसमुदायत्रिपादीपदेन च व्यदिश्यते। सप्तानामध्यायानां समाहारः सप्ताध्यायी। पादेन सह वर्तते इति सपादा। सपादा चासौ सप्ताध्यायी चेति सपादसप्ताध्यायी इति शब्दव्युत्पत्तिक्रमो विद्यते। अत्र च सपादसप्ताध्यायीपदञ्च लक्षणावृत्या सपादसप्ताध्यायीस्थं शास्त्रं बोधयति। लक्षणा चात्र शब्दशास्त्रे अप्रसिद्धा शक्तिरूपा एव। एवञ्च त्रयाणां पदानां समाहारः इति त्रिपादी, अत्रापि लक्षणया तत्रत्यं शास्त्रं बुध्यते। एतावता फलति सपादसप्ताध्यायीस्थशास्त्रं प्रति त्रिपादीस्थं शास्त्रमसिद्धं भवतीति। त्रिपाद्यामपि पूर्वशास्त्राणामपेक्षया परशास्त्राणामसिद्धत्वमनेनैव विधीयते। तुल्यबलविरोधदशायां तु "विप्रतिषेधे परं कार्यम्" इति सूत्रनियमबलात्परकार्याणामेव प्रवृत्तिर्जायते। तुल्यबलविरोधो नाम अन्यत्रान्यत्र लब्धावकाशयोः शास्त्रयोः एकस्मिन् लक्ष्ये युगपत् प्राप्तिरिति। अधिकारसूत्राणामपि विधिसूत्राणामुपकारकत्वेन परिभाषासूत्राणामिव जायते व्यवहारः। त्रिपाद्यां सर्वत्र पूर्वत्र, सिद्धम् इति पदद्वयस्यानुवृत्या पदैकवाक्यतया सर्वत्र सूत्रेषु वाक्यार्थबोधो भवति। यथा "संयोगान्तस्य लोपः" इति सूत्रे पूर्वत्रासिद्धमित्यनुवर्तते। उभयोर्विधेयभेदात् भिन्नवाक्यतया सूत्रार्थ एवं सम्पद्यते– संयोगान्तं यत्पदं तदन्तस्य लोपो भवति इदञ्च शास्त्रं पूर्वस्मिन् कर्तव्येऽसिद्धमिति। यस्मिन् सूत्रेऽस्यानुवृत्तिः,

तस्मात्पूर्वाणि यानि शास्त्राणि तेष्वसिद्धमिति। वाक्यैकवाक्यानन्तरं "संयोगान्तस्य लोपः" इति सूत्रस्थपूर्वत्रशब्देन सपादसप्ताध्यायीस्थानां तथाष्टमाध्यायद्वितीयपादैकविंशतिसूत्राणाञ्च ग्रहणं भवतीति अवगन्तव्यम्। तेषु कर्तव्येषु संयोगान्तलोपोऽसिद्ध इति। अत एव अनड्वान् इत्यत्र "नलोपः प्रातिपदिकान्तस्य" इति सूत्रदृष्ट्या संयोगान्तस्य हकारलोपासिद्धत्वेन नकारस्य पदान्तत्वाभावान्नलोपो नैव भवति। एवं क्रमेण सर्वेषु सूत्रेषु एकवाक्यतया असिद्धत्वं भवतीति विज्ञेयम्।

### कार्यासिद्धत्वं शास्त्रासिद्धत्वं वा

अत्र च विचार्यते पूर्वत्रासिद्धमिति सूत्रेणासिद्धत्वमारोप्यते तत्र च कार्यासिद्धत्वपक्षस्याश्रायणं क्रियते आहोस्वित् शास्त्रासिद्धत्वपक्षस्येति विचारणीयं भवति। अर्थात् पूर्वशास्त्रं प्रति परशास्त्रमसिद्धं भवति अथवा परशास्त्रेण विहितं कार्यं पूर्वशास्त्रदृष्ट्या असिद्धं भवतीति ? यदि सूत्रेऽस्मिन् कार्यासिद्धत्वपक्षस्यैवाश्रयणं क्रियते चेन्मनोरथः इत्यादिप्रयोगाणां सिद्धिर्नैव जायत इति। कार्यासिद्धत्वं नाम कार्यं कृत्वा ततोऽसिद्धिः इति तेन मनस् रथः इत्यवस्थायां "ससजुषो रुः" इति सूत्रेण पदान्तस्य सस्य रुत्वे कृते सति "हशि च" इति सूत्रेण उत्वं नैव भवति अपि तु परत्वाद् "रो रि" इत्यनेन रेफस्य लोपो भवितुमर्हति। एवञ्च 'देवदत्तहन्तृहतन्यायाल्' लोपे कृते सति "हशि च" इति सूत्रदृष्ट्या "रो रि" इत्यस्यासिद्धत्वेऽपि रेफस्योन्मज्जनं न भवति। देवदत्तहन्तृहतन्यायस्याशयो भवति देवदत्तस्य हन्तरि हते सति देवदत्तस्य उज्जीवनं नैव भवति। तथा चात्र देवदत्तस्थानीयस्य रेफस्य हननसदृशलोपसम्पादकं "रो रि" इति शास्त्रं तस्य प्रवृत्तिरेव हननम्, पुनश्च तस्य पूर्वत्रासिद्धम् इत्यनेन हनने कृते सति रेफस्योन्मज्जनं नैव भवति। तेन "हशि च" इत्यनेन उत्वं नैव जायते तथा च रेफलोपानन्तरमसिद्धत्वस्य चर्चैव न भवति अतः 'मनोरथः' इत्यस्य सिद्धिर्नैव भवति। एवञ्च यदि कार्यासिद्धत्वपक्षस्यैवाश्रयणं क्रियते भाष्यकारसिद्धान्तोऽपि खण्डितो भवति। भाष्यकारेण उक्तमस्ति – "पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्य" इति अर्थात् कार्यासिद्धत्ववादिनां मते त्रैपादिकशास्त्रजन्यवाक्यार्थबोधकाले यथा शास्त्रस्यासिद्धत्वं नैव कर्तुं शक्यते तथैव तद्बोध्यकार्यस्यापि तज्ज्ञानवेलायामसिद्धत्वं नैव कर्तुं शक्यते अपि तु लक्ष्ये प्रवृत्युत्तरमेवासिद्धत्वं वक्तुं शक्यते। तथा च 'मनोरथः' इत्यत्र एककालावच्छेदेन शास्त्रद्वयस्य प्राप्तिर्भवति। एतावतोत्तरशास्त्रस्यापि सत्ता अपेक्षिता एवञ्च यदि उत्तरशास्त्रस्य सत्ता भवति तर्हि पूर्वत्रासिद्धीयविषयतायां विप्रतिषेधशास्त्रस्यापि विषयता प्राप्ता। एवं सति 'पूर्वत्रासिद्धे नास्ति विप्रतिषेधः उत्तरस्याभावाद्'इति अभावोत्पादकं भाष्यमसङ्गतं भवति, विप्रतिषेधाभावस्योपपादकहेतोरसिद्धिरिति भावः। तेन कार्यासिद्धत्वपक्षः नैव समीचिनः। अत्र च पुनः कार्यासिद्धत्वत्वपक्षे च यदि अभावादुत्तरस्येति वाक्यघटकस्योत्तरपदस्यार्थः उत्तरशास्त्रबोध्यकार्यस्य एवं क्रियते चेद् भाष्येण साकं नैव कश्चिद् विरोधः। यतो हि विप्रतिषेधशास्त्रस्य त्रिपाद्यां प्रवृत्तिर्नैव भवति उत्तरशास्त्रबोध्यकार्यस्याभावादिति भाष्याशयः। तथा चात्र "हशि च" "रो रि" इत्यनयोर्मध्ये उत्तरशास्त्रम् "रो रि" इति, तद्बोध्यकार्यस्याभावो भवतीति भाष्याशयः। अतः एव विप्रतिषेधशास्त्रस्य त्रिपाद्यां प्रवृत्त्यभाव इति। तेन कार्यासिद्धत्ववादिनां मतेऽपि भाष्यविरोधो नास्ति। कार्यासिद्धत्वपक्षे पूर्वत्रासिद्धमिति सूत्रे विद्यमानस्य पूर्वपदस्य तथा

आक्षिप्तपरशब्दस्य च स्वजन्यबोधविषयतासम्बन्धेन पूर्वपदस्य पूर्वशास्त्रजन्यबोधविशिष्टकार्ये एवञ्च परपदस्य परशास्त्रजन्यबोधविशिष्टकार्ये लक्षणा विधीयते। तथा सति सूत्रस्यार्थो भवति– 'सपादसप्ताध्यायीस्थशास्त्रजन्यबोधविशिष्टं कार्यं प्रति त्रिपादीशास्त्रजन्यबोधविशिष्टकार्यमसिद्धं भवति'। लक्षणया सूत्रस्यार्थो एवं प्रकारेण स्वीकारे सति लक्ष्येषु प्रवृत्तिपूर्वमेव शास्त्रेष्वेव परकार्यमसिद्धं जायते। एतावता उत्तरस्य अभावो भवत्येव। भाष्यासङ्गतिरस्तीति वक्तुं नैव शक्यते। तथा चास्य समाधानं हरिदीक्षितः स्वकीयायां मनोरमायाः शब्दरत्नटीकायां करोति। अत्र लक्षणायां किमपि प्रमाणं नास्ति। यदि अभावादुत्तरस्यायमेव पदं लक्षणायाः कृते प्रमाणमिति चेद् समाधानान्तरं कथयति तत्रैव टीकायां हरिदीक्षितः – फलाभावादिति। फलाभावाद् इत्यस्य तात्पर्यमस्ति फलान्तराभावादिति। अर्थाद् लक्षणास्वीकारेऽपि एतादृशं किञ्चिदप्यपूर्वं फलं दृश्यते यत् शास्त्रासिद्धत्वपक्षे नैव स्यादिति येन कार्यासिद्धत्वपक्षस्याश्रयणं कर्तव्यमिति। एवञ्च कार्यासिद्धत्वपक्षे गौरवमपि भवति। शास्त्रासिद्धत्वपक्षे लक्षणां विनैव निर्वाहो भवति पुनः लक्षणावृत्तिरङ्गीकारे महद्गौरवमिति।

पुनश्च कार्यासिद्धत्वक्षे यथा मनोरथः इति प्रयोगस्य सिद्धिर्नैव भवति तथैव अमू, अमी इत्यादिप्रयोगाणामपि सिद्धिर्न भवति। तत्र हि– अदश्शब्दाद् प्रथमायाः द्विवचने औ विभक्तौ तथा च बहुवचने जस्विभक्तौ, अदस् औ, अदस् जस् इत्यत्र "त्यदादीनामः" इति सूत्रेण उभयत्र अकारादेशः, अदस् जस् इत्यत्र च "जसि च" इति "जसः शी" कृते सति अद अ औ, अद अ ई इति भवति। अत्र च "अतो गुणः" इति पररूपं तथैव अदसोऽसेः इति सूत्रेण मुत्वञ्च प्राप्नोति। एवञ्च निरधिष्ठानारोपासम्भवाद् पूर्वं तावदत्र परशास्त्रकार्यं मुत्वं भवति कृत्वा तदनन्तरं "पूर्वत्रासिद्धम्" इति सूत्रेण सपादसप्ताध्यायीस्थं पररूपं प्रति त्रिपादीस्थं मुत्वरूपं कार्यमसिद्धं भवति। अत्र च मुत्वस्यासिद्धत्वेऽपि देवदत्तहन्तृहतन्यायेनाकाराभावाद् पररूपं नैव भवति तस्माद् 'अमू' 'अमी' इत्यादिप्रयोगाणां निष्पत्तिर्नैव जायते। कार्यासिद्धत्वपक्षे मुत्वस्य प्रथमं तावद् कर्तव्यं भवति तत्र करणत्वञ्च पूर्वत्रासिद्धमित्यनेनासिद्धत्वस्य अतिदेशो विधीयते। अतिदेशस्य चारोपस्वरूपत्वाद् निरधिष्ठानारोपस्य चासम्भवाद् कार्येऽसिद्धत्वविधानार्थं प्रथमं तावद् कार्यस्य विधानमावश्यकम्। तथा च यदा प्रथमं कार्यस्य विधानं क्रियते तदा पूर्वोक्तप्रकारेण पररूपाभावाद् अमू, अमी इत्यादिप्रगोगाणां सिद्धिर्न भवति। अतः एव एतत् सर्वं पर्यायालोचनेन ज्ञायते यद्– कार्यासिद्धत्वपक्षे बहवः दोषाः सन्ति तेन पक्षान्तरस्य शास्त्रासिद्धत्वपक्षस्यैवाश्रयणं कर्तव्यं भवति। स्वीकृते च शास्त्रासिद्धत्वपक्षे "अतो गुणः" इति शास्त्रदृष्ट्या मुत्वविधायकं शास्त्रमसिद्धं भवति। अर्थान्मुत्वात्पूर्वमेव पररूपं भवति ततः अद औ इत्यवस्थायां वृद्धिमुत्वयोः युगपद् प्राप्तौ सत्यां मुत्वस्य त्रिपादीत्वादसिद्धत्वं भवति तेन पूर्वं तावद् वृद्धिः, ततः मुत्वे कृते सति अमू इत्यस्य निष्पत्तिः। अत्र शास्त्रासिद्धत्वपक्षे सपादीसूत्रस्य त्रिपादीसूत्रस्य च एककालावच्छेदेन एकस्मिन् लक्ष्ये प्राप्तौ सत्यां त्रिपादीशास्त्रं पूर्वमेवासिद्धत्वं भवति। यदि सपादीसूत्रस्य प्रवृत्युत्तरमपि त्रिपादीसूत्रस्य प्राप्तिर्भवति चेत् कार्यं तु भवत्येव। तेनैव अमू इत्यादौ पररूपविधानानन्तरं त्रिपादीकार्यं मुत्वमपि भवति। कदाचिदत्र पक्षे त्रैपादिकसूत्रस्याप्यन्तरङ्गत्वाद् पूर्वमेव प्रवृत्तिर्दृश्यते। तत्र चान्तरङ्गत्वादित्युच्यमाने अन्तरङ्गपरिभाषया तत्कार्यस्य पूर्वं प्रवृत्तिरस्ति इति न यतो हि त्रिपाद्यामस्याः परिभाषायाः प्रवृत्तिरेव न भवति। अतः एव अन्तरङ्गत्वादित्यस्यार्थो

भवति स्वनिमित्तस्यादौ सत्त्वादिति। अर्थाद् त्रैपादिकसूत्रस्य निमित्तस्योपस्थितिः पूर्वमेव जायते तेन त्रैपादिकसूत्रस्य प्रथमं तावद् प्रवृत्तिः। तथा च एवं प्रकारेण शास्त्रासिद्धत्वपक्षे सपादसप्ताध्यायीस्थशास्त्रस्य प्रवृत्तेः पूर्वमेव यत्र त्रैपादिकस्य शास्त्रस्य प्रवृत्तिर्भवति तत्र च सपादीसूत्रप्रवृत्तिकाले त्रैपादिसूत्रेऽभावारोपो विधीयते। अत्र चारोपमेव असिद्धत्वमिति। यदा त्रिपादीसूत्रे एव अभावारोपो क्रियते तदा तेन विहितस्य कार्यस्यापि सुतरामभावत्वं बोध्यते। कार्याभावस्य तात्पर्यञ्च तन्निवृत्तिबुद्धेरभावः अर्थाद् स्थानिनिवृत्तेरभावः। आदेशबुद्ध्यभावो लक्ष्ये जातत्वबुद्ध्यभावश्च नागेश (मिश्रः, २०१७, पृ.११८)। अर्थाद् पूर्वप्रवृत्ते त्रैपादिके सूत्रेऽभावारोपाद् तत्र स्थानिनः निवृत्तिबुद्धिः, आदेशबुद्धिः एवं लक्ष्ये जातत्वबुद्धेरभावस्य च बोधो भवति। परिणामं तु तत्र सपादीसूत्रेण आदेशेऽपि स्थानिबुद्धिर्भवति। यथा भ्रमदशायां रजतत्वाभावति शुक्तौ प्रवृत्तस्य पुरुषस्य प्रवृत्तिविषयशुक्तिरेव भवति न तु रजतं, तथैव त्रैपादिकसूत्रेण विहिते आदेशे एव स्थानिबुद्ध्या सपादसप्ताध्यायीसूत्रस्य प्रवृत्तिविषयोऽऽदेश एव। तत्र आचार्येण नागेशेनाप्यभिहितं स्वशेखरग्रन्थे– न हि रतजभ्रमप्रयुक्ता प्रवृत्तिः शुक्तिं न गोचरयतीति (मिश्रः, सन् २०१७, पृ. ११८)। न चात्र पूर्वत्र न इत्येव सूत्रमस्तु, यतो हि पूर्वशास्त्रं प्रति परशास्त्रस्यासिद्धत्वारोपापेक्षया पूर्वशास्त्रस्य कर्तव्यतायां परशास्त्रस्य प्रवृत्तिरेव नैव भवति इत्येवार्थं समीचिनं प्रतिभाति।

अतः पूर्वत्रासिद्धमित्यस्य स्थाने पूर्वत्र न इत्येव सूत्रमुचितम्। परशास्त्रेऽसिद्धत्वारोपेण यत्कार्यं भवति तत्सर्वं पूर्वशास्त्रस्य प्राप्तिदशायां परशास्त्रस्याप्रवृत्तेरेव जायते। तेन पूर्वत्रासिद्धम् इत्यनेन असिद्धारोपं कर्तुमनुचितम् इति प्रश्नकर्तुराशयः। तत्तु न सम्यक् प्रतिभाति यतो हि – अत्र जिजासा जायते पूर्वशास्त्रस्य प्राप्तौ परशास्त्रस्य प्रवृत्तिः नैव भवति आहोस्वित् पूर्वशास्त्रस्य विषयतायाः सम्भावनायां परशास्त्रस्य प्रवृत्तिर्नैव भवति ? यद्यत्र प्रथमकल्पो स्वीक्रियते चेन् "नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति" इति नियमशास्त्रं व्यर्थं भवति। कारणत्वञ्च पूर्वत्रासिद्धमिति सूत्रसत्वास्थायां नलोपस्यासिद्धत्वाद् नलोपः सूत्रस्य व्यर्थत्वं स्पष्टमेव। व्यर्थं सज्ज्ञापयति सुबादिविधिष्वेव नलोपस्यासिद्धत्वं भवति नान्यत्रेति नियमो फलति। अस्य फलन्तु राज्ञः अश्वः इत्यवस्थायां राजन् अश्वः इति जाते समासे कृते सति यदा "नलोपः प्रतिपदिकान्तस्य" इति सूत्रेण नकारस्य लोपो भवति। तदनन्तरञ्चात्र प्राप्तस्य सवर्णदीर्घस्य सुप्स्वरसंज्ञादिविधिभिन्नत्वाद् नलोपस्यासिद्धत्वं नैव भवति तेन दीर्घो जायते राजाश्वः इति प्रयोगस्य सिद्धिर्जायते। यद्यत्र पूर्वत्र न इत्येव सूत्रमुच्यते तदा राजन् अश्व इत्यत्र कस्यापि पूर्वसूत्रस्य प्राप्तिरेव नास्ति तेन पूर्वत्र न इति निषेधस्य प्रवृत्तिर्नैव भवति। तथा च नलोपं कृत्वा दीर्घे कृते सति राजाश्वः इति प्रयोगस्य साधुत्वं भवत्येव पुनः नलोपसूत्रस्य वैयर्थ्यं सुस्पष्टमेव। यद्युच्यते नलोपानन्तरं पूर्वशास्त्रस्य "अकः सवर्णे दीर्घः" इत्यस्य प्राप्तौ सत्यां पूर्वत्र न इति निषेधो भवतीति चेद् 'भुक्तवन्तं प्रति मा भुङ्क्था' एवं रीत्या नलोपस्य निषेधो नैव भवितुमर्हति। यथा भोजनकर्तारं भोजानन्तरं भोजननिषेधस्याकिञ्चिकरत्वं तथैव नलोपानन्तरमपि नलोपनिषेधं व्यर्थमिति। एतावता अस्मिन् पक्षे नलोपसूत्रस्य व्यर्थत्वं स्पष्टमेव। तथाप्यत्र पक्षे नलोपः सूत्रस्याकरणत्वरूपं लाघवं दृश्यते किन्तु तन्नोपयुक्तमिति। नलोपसूत्राभावे राजन् भ्यामित्यवस्थायां पूर्वसूत्रस्य "सुपि च" इत्यस्याप्राप्तौ पूर्वत्र न इत्यस्यापि प्रप्तिर्नैव भवति तेनात्र नलोपं कृत्वा "सुपि च" इत्यनेन दीर्घे कृते सति राजाभ्यामिति अनिष्टरूपापत्तिर्जायते। पुनश्च यदि पूर्वत्र न इत्यस्य अर्थनिरूपणावसरे

द्वितीयोऽर्थः स्वीक्रियते चेद् पूर्वशास्त्रस्य विषयतायाः सम्भावनायां परशास्त्रस्य प्रवृत्तिर्नैव भवति तदपि नोचितम्। परशास्त्रस्य नलोपेति सूत्रस्याप्रवृत्तौ सत्यां राजभ्यामिति प्रयोगस्य सिद्धिरेव नैव जायते। तेन एतावता ज्ञायते पूर्वत्रासिद्धम् इत्येव सूत्रं कर्तव्यमिति। न तु पूर्वत्र न इति। अत्र च न्यासकल्पलताकारश्चात्र किञ्चिद् पृथङ्गतमुपस्थापति। तस्य मतेऽत्र 'पूर्वत्र' इत्येव सूत्रमस्तु तथा चात्र "आमन्त्रितं पूर्वमविद्यमानवद्" इति पूर्वसूत्राद् अविद्यमानवदिति पदस्यानुवृत्तिर्जायते तथा च सूत्रार्थो भवति – पूर्वशास्त्रस्य कर्तव्यतायां परशास्त्रस्याविद्यमानवद् भवतीति। एवञ्च मनोरथः इत्यत्र पूर्वशास्त्रेणोत्वे कर्तव्ये "रो रि" इति परशास्त्रस्याविद्यमानवद्भावेन मनोरथ इत्यत्रोत्वं भवत्येव न क्षतिः। तेन पूर्वत्र इत्येव सूत्रमस्तु इति तस्याशयः, तन्न सम्यक् प्रतिभाति यतो हि पूर्वत्र इत्येव यदि सूत्रं क्रियते तर्हि गोमान् इत्यत्र दर्घात् पूर्वं नलोपे जाते तत दीर्घे कर्तव्ये कुलालस्याविद्यमानत्वेऽपि तत्कृतकार्यस्य विद्यमानत्वन्यायेन नलोपशास्त्रस्याविद्यमानत्वेऽपि तत्कृतकार्यस्याविद्यमानत्वाभावाद् गोमान् इति प्रयोगस्य सिद्धिर्नैव भवति। नान्तोपधाभावादिति। एतावता सूत्रेऽसिद्धग्रहणं कर्तव्यमेवेति (शास्त्री, सन् १९९६, पृ. ६)।

## अधिकारत्वं विधित्वं वा

एवमेवास्य सूत्रस्य च स्वतन्त्रविधिसूत्रत्वमेव स्वीक्रियते चेद् तदा सपादसप्ताध्यायीस्थशास्त्रं प्रति त्रिपादीस्थं शास्त्रमसिद्धम् इत्येवार्थो भवति पूर्वत्रिपादीस्थसूत्रदृष्ट्या परत्रिपादीस्थं सूत्रमसिद्धं नैव स्यादिति। अतः एवास्य सूत्रस्याधिकारत्वं स्वीकर्तव्यमिति। तथा सत्यस्य सूत्रस्याधिकारत्वाङ्गीकारे श्रृङ्गिग्राहकन्यायेन उत्तरोरत्तरेष्वपि सूत्रेषु जायते अस्याधिकारः। तेन पूर्वत्रिपादीस्थशास्त्रदृष्ट्यापि परत्रिपादीस्थं शास्त्रमसिद्धं भवतीति लभ्यते। अतः अधिकारोऽयमिति दीक्षितवाक्यस्य उपपत्तिर्जायते। तथा च वृत्तावपि सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा, त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धम् स्यादित्युक्तम्। अधिकारसूत्राणां लक्षणन्तु परिभाषेन्दुशेखरस्य भूतितिलकटीकायां यथोद्देशपरिभाषायाः व्याख्यानावसरे आचार्येण तात्याशास्त्रिणा एवं प्रतिपादितम्– 'स्वदेशे लक्ष्यसंस्कारोपयोगिविधिशास्त्रीयवाक्यार्थबोधोपकारकवाक्यार्थाननुभावकत्वे सति विधिशास्त्रीयलक्ष्य-संस्कारोपयोगिवाक्यार्थबोधप्रयोजकत्वमिति' (शास्त्री, सन् २०१२ पृ. ११), अधिकारसूत्राणि विधिशास्त्रेण सह एकवाक्यतया लक्ष्यसंस्कारोपयोगिवाक्यार्थबोधं जनयन्ति। तेनास्यापि अधिकारसूत्रस्य स्वदेशे किञ्चिदप्युपयोगं नैव दृश्यते, स्वातन्त्र्येण च न किञ्चिद् विधत्ते तथापि उत्तरोत्तरेण संबध्य वाक्यैकवाक्यतया असिद्धत्वमारोपयति। एतावता अस्य सूत्रस्याधिकारत्वं सुनिश्चितम्। तेन त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यादित्यस्यापि लाभो भवत्येव। अतः एव 'गाधुङ्गान्' इत्यादिप्रयोगाणामपि सिद्धिर्जायते। यदि अस्य सूत्रस्याधिकारत्वं नाङ्गीक्रियते चेद् त्रिपाद्यामस्य नियमस्याप्रवृत्या गोधुङ्गान् इत्यादिप्रयोगाः नैव सम्भवन्ति। यतो हि तत्र गां दोग्धि इति गोधुगत्र कर्तरि प्रथमं तावद् भवति क्विप्प्रत्ययो तेन गोधुगित्यस्य निष्पत्तिः। ततः गोधुक् अस्यास्तीति प्रथमान्ताद् गोधुक्शब्दाद् "तदस्यास्त्यस्मिन्निति मतुप्" (द्विवेदी, सन् २०१६, पृ. ७१) इति सूत्रेण भवति मतुप्प्रत्ययः, सुपो लुकि 'गोधुह् मत्' इति जाते अत्र प्रथमं तावद् "दादेर्धातोर्घः" इति सूत्रेण पदान्तस्य हकारस्य स्थाने घकारादेशे कृते सति गोधुघ् मत् इति

भवति। तदनन्तरं "झलां जशोऽन्ते" इति सूत्रेण जश्त्वस्य, तथैव "यरोऽनुनासिकेऽनुनासिको वा" इति सूत्रेण अनुनासिकस्य, एवञ्च "एकाचो वशो भष् झषन्तस्य स्ध्वोः" इति भष्भावस्य च प्राप्तिरस्ति। अत्र च जश्त्वापेक्षया भष्भावस्यापवादत्वमस्ति, तेन जश्त्वं प्रबाध्य अपवादत्वाद् भष्भावस्य प्राप्तिरस्ति। पुनश्च भष्भावापेक्षया अनुनासिकस्य परत्वं नित्यत्वञ्चास्ति तेन भष्भावमपि प्रबाध्य यरोऽनुनासिके इत्यनेन अनुनासिकस्य प्राप्तिरस्ति। तथा च अनुनासिकापेक्षया अपरनिमित्तकत्वेन जश्त्वस्यान्तरङ्गत्वम्, तेनान्तरङ्गत्वादनुनासिकं प्रबाध्य जश्त्वस्य प्राप्तिरस्ति। एवं क्रमेण पुनश्चापवादत्वाद् जश्त्वं प्रबाध्य भष्भावस्य प्राप्तिः, तथैव भष्भावमपि प्रबाध्य परत्वान्नित्यत्वाच्चानुनासिकस्य प्राप्तिरस्ति तथा च अन्तरङ्गत्वादनुनासिकमपि प्रबाध्य जश्त्वस्य प्राप्तिरिति। एवं क्रमेण चक्रकस्य दोषस्य विद्यमानत्वाद् गोधुङ्ङान् इति प्रयोगस्य सिद्धिर्नैव जायते। तेन अवश्यमेव पूर्वत्रासिद्धमिति सूत्रस्याधिकारत्वमेव स्वीकर्तव्यमिति। अधिकारत्वस्वीकारे च गोदुघ् मत् इत्यत्र एककालावच्छेदेन जश्त्वभष्भावानुनासिकेषु प्राप्तौ सत्यां भष्भावापेक्षया पूर्वत्रैपादिकत्वेन जश्त्वानुनासिकत्वयोरसिद्धत्वात्पूर्वं भष्भावो भवति गोधुघ् मत् इति, ततश्च जश्त्वापेक्षया अनुनासिकस्य पूर्वत्रैपादिकत्वेनासिद्धत्वाद् जश्त्वं भवति तेन गोधुग् मत् इति भवति। ततः एव "यरोऽनुनासिकेऽनुनासिको वा" इति सूत्रेणानुनासिके कृते सति गोधुङ्ङत् इति भवति। ततः विभक्तिकार्ये कृते 'गोधुङ्ङान्' इति प्रयोगस्य सिद्धिर्जायते। एतदेव हरिदीक्षितेन प्रौढमनोरमायाः व्याख्यानावसरे लघुशब्दरत्नटीकायां गोधुङ्ङान् इत्यादौ घत्वजश्त्वानुनासिकेषु भष्भावो न स्यादित्युक्तम् (पाण्डेयः, सन् २०१२, पृ.१०८)। अर्थाद् घत्वजश्त्वानुनासिकेषु घत्वानुनासिकयोः कृतयोः भष्भावो न स्यादिति एतदेवास्याः पङ्क्तेराशयः। एतदेवास्त्यस्याधिकारत्वस्य फलमिति। तेनास्य सूत्रस्याधिकारत्वमेवाङ्गीकत्र्तव्यमिति। अत्र ज्ञातव्यं यदस्ति गोधुङ्ङानिति प्रयोगनिष्पत्तौ अनुनासिकत्वञ्च "यरोऽनुनासिकेऽनुनासिको वा" इति सूत्रस्थेन "प्रत्यये भाषायां नित्यम्" इति वार्तिकेण भवतीति ध्यातव्यम्।

वस्तुतस्तु अत्रास्य सूत्रस्याधिकारत्वानङ्गीकारे गोदुह् मान् इत्यत्र हकारस्य घत्वे कृते गोदुघ् मान इत्यत्र झयः इति सूत्रेण वत्वापत्तिः। भष्भावस्यानापत्तिरिति यदुक्तं तद्वक्तुं नैव शक्यते। यतो हि घत्वविधानानन्तरं अपवादत्वाद् जश्त्वं तथा च अन्तरङ्गत्वाद् अनुनासिकं प्रबाध्य भष्भावो भवति। अतः अत्र भष्भावानापत्तिरूपो दोषो नैवास्ति किन्तु घत्वविधानानन्तरं प्रतिपदोक्तत्वाद् "झयः" इति सूत्रेण मकारस्य वकारो भवितुमर्हति तेन गोधुङ्ङान् इति प्रयोगस्य सिद्धिर्नैव जायते। अतः अस्य सूत्रस्याधिकारत्वमेवाङ्गीकर्तव्यमिति सुस्थिरम्। तेन पूर्वत्रिपादिशास्त्रदृष्ट्या परत्रिपादिशास्त्रस्यासिद्धत्वाद् "झयः" इति सूत्रदृष्ट्या "दादेर्धातोर्घः" इत्यस्यासिद्धत्वम्। फलतः झयन्तत्वस्याभावाद् न वत्वापत्तिः। तेनात्र क्रमशः भष्भावः जश्त्वम्, ततोऽननुनासिकमिति। तथा च अस्य सूत्रस्याधिकारत्वस्वीकारादेव 'श्चुत्वं धुटि सिद्धं वाच्यम्' इति वार्तिकस्य चारितार्थ्यमपि भवति। तथा च अड्श्च्योतति इति प्रयोगे धुड्विधायकपूर्वत्रिपादी "डः सि धुट्" इति सूत्रदृष्ट्या परत्रिपाद्याः श्चुत्वविधायकस्य "स्तोः श्चुना श्चुः" इति सूत्रस्यासिद्धत्वाद् धुटः प्राप्तिरस्ति। तस्य प्रतिषेधार्थं वार्तिककारेण "श्चुत्वं धुटि सिद्धं वाच्यम्" इति वार्तिकं संरचितम्। अस्यार्थस्तु धुट्कर्तव्यतायां श्चुत्वस्यासिद्धत्वं नैव भवतीति। यदा श्चुत्वस्यासिद्धत्वं नैव भवति तदा धुडपि नैव भवति।

यतो हि धुडागमस्तु सकारे परे सत्येव भवति। अत्र यदि अस्य सूत्रस्याधिकारत्वं नैव स्वीक्रियते तर्हि त्रिपाद्यां पूर्वं प्रति परशास्त्रस्यासिद्धत्वं नैव भवति फलतः धुडागमस्य प्राप्तिरेव नैवास्ति पुनः तस्य वारणार्थं वार्तिकारम्भस्याकिञ्चित्करत्वमिति। तेन विज्ञायते पूर्वत्रासिद्धमिति सूत्रं अधिकारसूत्रमेवेति। तेन धुडागमं प्रति श्चुत्वस्यासिद्धत्वाद् प्राप्तधुडागमस्य वारणार्थेन वार्तिकस्य सार्थक्यमिति। तथा च अधिकारत्वं नाम उत्तरोत्तरसम्बन्धः। तेन अस्य सूत्रस्य यस्मिन् सूत्रेऽधिकारो जायते तत्सूत्रं पूर्वसूत्रदृष्ट्यासिद्धत्वं भवति। सिद्धे परशास्त्रेऽसिद्धविधाने असिद्धवदिति लभ्यते सिंहो माणवकः इतिवत् (उपाध्यायः, सन् १९६६, पृ.४०)। एवञ्चास्य सूत्रस्य विधित्वमधिकारत्वं वा उभयमपि सिद्धम्। विधिसूत्रत्वाङ्गीकारे सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा भवति इत्यर्थो लभ्यते, अधिकारत्वस्य प्रयोजनं तु यत्र यत्राधिकारो जायते तत्र तत्र तत्तसूत्रं पूर्वशास्त्रापेक्षयासिद्धत्वमिति। एवञ्चेदं सूत्रं स्वातन्त्र्येण न किमपि विधत्ते। किन्तु उत्तरोत्तरेण सम्बध्य वाक्यभेदेन असिद्धत्वमारोपयति। यथा "संयोगान्तस्य लोपः" इति सूत्रे पूर्वत्रासिद्धमित्यनुवर्तते। उभयोर्विधेयभेदात् भिन्नवाक्यतया सूत्रार्थ एवं सम्पद्यते– संयोगान्तं यत्पदं तदन्तस्य लोपो भवति इदञ्च शास्त्रं पूर्वस्मिन् कर्तव्येऽसिद्धमिति। यस्मिन् सूत्रेऽस्यानुवृत्तिः, तस्माद् पूर्वाणि यानि शास्त्राणि तेष्वसिद्धमिति। वाक्यैकवाक्यानन्तरं "संयोगान्तस्य लोपः" इति सूत्रस्थपूर्वत्रशब्देन सपादसप्ताध्यायीस्थानां तथाष्टमाध्यायद्वितीयपादैकविंशतिसूत्राणाञ्च ग्रहणं भवतीति अवगन्तव्यम्। तेषु कर्तव्येषु संयोगान्तलोपोऽसिद्ध इति। अत एव अनड्वान् इत्यत्र "नलोपः प्रातिपदिकान्तस्य" इति सूत्रदृष्ट्या संयोगान्तस्य हकारलोपासिद्धत्वेन नकारस्य पदान्तत्वाभावाद् नलोपो नैव भवति। एवं क्रमेण सर्वेषु सूत्रेषु एकवाक्यतया असिद्धत्वमिति विज्ञेयम्। अधिकारसूत्रस्य लक्षणं च एवं प्रकारेण प्रतिपादितम् स्वदेशे लक्ष्यसंस्कारोपयोगिबोधाजनकत्वे सति विधिशास्त्रैकवाक्यतया लक्ष्योपयोगिबोधजनकत्वमधिकारसूत्रत्वमिति। अर्थात् विधिशास्त्रेण सह एकवाक्यतां विना यस्य लक्ष्योपयोगी वाक्यार्थबोधो नैव जायते तदेवाधिकारसूत्रमिति। पूर्वत्रासिद्धमिति सूत्रस्य वाक्यार्थबोधस्तु विधिशास्त्रस्य वाक्यार्थबोधेन साकं यदि एकवाक्यता नैव भवति तदा तत्सूत्रं लक्ष्यसंस्कारकमपि नैव भवितुमर्हति तेन इदं सूत्रं विधिसूत्रेण सह वाक्यभेदेनान्वितो भवति। यथा हो ढः इत्यत्र यदा अस्य सूत्रस्याधिकारो जायते तदा तस्यार्थो भवति हकारस्य ढकारादेशो भवति तथा च ढकारादेशस्तु पूर्वशास्त्रस्य कर्तव्यतायामसिद्धं भवतीति। एवं रीत्या वाक्यभेदो भवति। यत्र यत्र विधेयभेदो भवति तत्र तत्र वाक्यभेदो भवत्येव। अत्र "हो ढः" इत्यस्य विधेयं ढत्वं, पूर्वत्रासिद्धमित्यस्य विधेयत्वञ्चासिद्धत्वम्। एवं प्रकारेण सर्वत्र वाक्यभेदेनैव कार्यं प्रचलति।

अत्र च सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धत्वं यदुक्तं तदयुक्तमिव प्रतिभाति। यतो हि सपादसप्ताध्यायीस्थानां सकलसूत्राणाम् एकस्मिन् लक्ष्ये प्राप्तिर्नैव भवति एवं त्रिपादीसूत्रेष्वपि सामान्यरूपेण पूर्वं प्रति परशास्त्रस्यासिद्धत्वं यद्युच्यते तदा अपवादशास्त्रमपि पूर्वोत्सर्गशास्त्रं प्रति असिद्धत्वं भवितुमर्हति। एतत्सर्वं समालोच्य तत्र भवता नागोजिभट्टेन लघुशब्देन्दुशेखरे उक्तम्– पूर्वत्रेति संग्राहकमेव । पूर्वत्रासिद्धमिति सूत्रं संग्राहकं सूत्रमस्ति। तथा च श्रृङ्गिग्राहकन्यायेन तत्तच्छास्त्रस्य नामाङ्गीकृत्यासिद्धत्वं प्रतिपादयति। अस्य न्यायस्य तात्पर्यं तु यथा अनेकेषु गोषु सत्सु केनचिद् चैत्रस्य गौः कः ? इति एवं पृष्टे सति गोपालः तत्र गोश्रृङ्गं गृहीत्वा कथयति इयं गौः चैत्रस्येति। एवं

प्रकारेण अत्रापि शास्त्रे यस्य सूत्रस्य दृष्ट्या यस्यासिद्धत्वं बोधनीयं भवति तस्य नाम गृहीत्वा पूर्वशास्त्रं प्रति अमुकपरशास्त्रमसिद्धं भवतीति विज्ञापयति न तु पूर्वशास्त्रमात्रं प्रति परशास्त्रमात्रमिति। एवं प्रकारेण संग्राहकत्वेन स्वीकृते सति यत्सूत्रं प्रति यस्यापवादत्वं तत्सूत्रं परे विद्यमानेऽपि असिद्धत्वं नैव भवति। तथा च "हो ढः" "दादेर्धातोर्घः" इति सूत्रद्वये द्रष्टुं शक्यते। यद्यप्यत्र दादेर्धातोर्घः इति सूत्रं परत्रिपादीसूत्रमस्ति, "हो ढः" इति सूत्रञ्च पूर्वत्रिपादीसूत्रमस्ति तेन "हो ढः" इति सूत्रापेक्षया "दादेर्धातोर्घः" इत्यस्यासिद्धत्वं भवितुमर्हति तथापि अपवादत्वादसिद्धत्वं नैव भवति। तेन दकारादिषु धातुषु अपवादत्वाद् ढत्वं प्रबाध्य घत्वविधानं भवति। एवञ्च मनोरथः इत्यत्रापि सपादसप्ताध्यायीस्थं "हशि च" इति सूत्रं प्रति "रो रि" इति त्रिपादीसूत्रमसिद्धं भवति। अतः श्रृङ्गग्राहकन्यायेनासद्धित्वविधाने सति न कुत्राप्यव्यवस्थेति। अन्यत्सर्वं शेखरादिग्रन्थेषु व्याख्यानं विहितमिति।

## निष्कर्षः

अन्ते च सूत्रस्य परिनिष्ठितार्थो भवति – 'सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा, त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धम् स्यात्' अस्य सूत्रस्य शास्त्रासिद्धकार्यासिद्धयोर्मध्ये शास्त्रासिद्धपक्षस्यैव स्वीकारो विधीयते अन्यथा देवदत्तहन्तृहतन्यायेन मनोरथः अमू, अमी इत्यादिप्रसिद्धप्रयोगाणामपि सिद्धिर्नैव जायते। तथा च सम्पूर्णसूत्रस्य सूत्रार्थप्रकाशनपूर्वकं सोदाहरणं शेखरग्रन्थानुरूपं व्याख्यानमत्र प्रतिपादितम्। एवम् विधिसूत्रत्व–अधिकारत्वयोर्मध्ये च अधिकारत्वमेव स्वीक्रियत इति। विधिसूत्रत्वस्वीकारे सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा भवति इत्यर्थो लभ्यते च त्रिपाद्यां परस्परं बाध्यबाधकभावो नैव भवति। अधिकारत्वस्य प्रयोजनं तु यत्र यत्राधिकारो जायते तत्र तत्र तत्तसूत्रं पूर्वशास्त्रापेक्षयासिद्धत्वमिति। एवञ्चेदं सूत्रं स्वातत्र्येण न किमपि विधत्ते। किन्तु उत्तरोत्तरेण सम्बध्य वाक्यभेदेन असिद्धत्वमारोपयति। "संयोगान्तस्य लोपः" इति सूत्रे पूर्वत्रासिद्धमित्यनुवर्तते। उभयोर्विधेयभेदात् भिन्नवाक्यतया सूत्रार्थ एवं सम्पद्यते– 'संयोगान्तं यत्पदं तदन्तस्य लोपो भवति इदञ्च शास्त्रं पूर्वस्मिन् कर्तव्येऽसिद्धमिति'। अत एव अनड्वान् इत्यादिप्रयोगाणां निष्पत्तिर्जायते। पुनश्चात्र सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धत्वं यदुक्तं तदयुक्तमिव प्रतिभाति। यतो हि सपादसप्ताध्यायीस्थानां सकलसूत्राणाम् एकस्मिन् लक्ष्ये प्राप्तिर्नैव भवति एवं त्रिपादीसूत्रेष्वपि सामान्यरूपेण पूर्वं प्रति परशास्त्रस्यासिद्धत्वं यद्युच्यते तदा अपवादशास्त्रमपि पूर्वोत्सर्गशास्त्रं प्रति असिद्धत्वं भवितुमर्हति। एतत्सर्वं समालोच्य तत्र भवता नागोजिभट्टेन लघुशब्देन्दुशेखरे उक्तम्– पूर्वत्रेति सङ्ग्राहकमेव । पूर्वत्रासिद्धमिति सूत्रं सङ्ग्राहकं सूत्रमस्ति। तथा च श्रृङ्गिग्राहकन्यायेन तत्तच्छास्त्रस्य नामाङ्गीकृत्यासिद्धत्वं आरोपयति। यथा शास्त्रे यस्य सूत्रस्य दृष्ट्या यस्यासिद्धत्वं बोधनीयं भवति तस्य नाम गृहीत्वा पूर्वशास्त्रं प्रति अमुकपरशास्त्रमसिद्धं भवतीति विज्ञापयति न तु पूर्वशास्त्रमात्रं प्रति परशास्त्रमात्रमिति। एवं प्रकारेण संग्राहकत्वेन स्वीकृते सति यत्सूत्रं प्रति यस्यापवादत्वं तत्सूत्रं परे विद्यमानेऽपि असिद्धत्वं नैव भवति। तथा च "हो ढः" "दादेर्धातोर्घः" इति सूत्रद्वये द्रष्टुं शक्यते। यद्यप्यत्र दादेर्धातोर्घः इति सूत्रं परत्रिपादी सूत्रमस्ति, "हो ढः" इति सूत्रञ्च पूर्वत्रिपादी सूत्रमस्ति तेन "हो ढः" इति सूत्रापेक्षया "दादेर्धातोर्घः" इत्यस्यासिद्धत्वं भवितुमर्हति तथापि अपवादत्वादसिद्धत्वं नैव भवति। तेन

दकारादिषु धातुषु अपवादत्वाद् ढत्वं प्रबाध्य घत्वविधानं भवति। एवञ्च मनोरथः इत्यत्रापि सपादसप्ताध्यायीस्थं "हशि च" इति सूत्रं प्रति "रो रि" इति त्रिपादीसूत्रमसिद्धं भवति। अतः श्रृङ्गग्राहकन्यायेनासद्धित्वविधाने सति न कुत्राप्यव्यवस्थेति।

**कृतज्ञताज्ञापनम्**

शोधपत्रेऽस्मिन् व्याकरणमहाभाष्य–शेखर–मनोरमादिग्रन्थदिशा "पूर्वत्रासिद्धम्" इति सूत्रस्यार्थापनम्, शास्त्रासिद्धत्व–कार्यासिद्धत्वयोरनुशीलनम्, विधिसूत्रत्व–अधिकारसूत्रत्वविषये च पर्य्यालोचनं विहितमस्ति। सूत्रगतविषयाणां निरूपणप्रसङ्गेऽनुसन्धानात्मकलेखगतप्रविध्यादिविषये च परामर्शदातृभ्यो विद्वद्भ्यो धन्यवादं प्रयच्छामि। तथा च लेखमिदमाद्यान्तं सूक्ष्मेक्षिकया सम्परीक्ष्य यथावश्यकं परामर्शदातृभ्यो गुरुभ्योऽपि हार्दिकीं कृतज्ञतां व्यनज्मि।

**सन्दर्भग्रन्थाः**

उपाध्यायः, सभापतिः (सन् १९६६), वैयाकरणसिद्धान्तकौमुदी (लक्ष्मीटीका–द्वितीयांशः), मोतिलाल–वनारसीदासः।

त्रिपाठी, जयशङ्करलालः (२०७३), व्याकरणमहाभाष्यम्, चौखम्बाकृष्णदास–अकादमी।

द्विवेदी, शशिकान्तः (सन् २०१६), अष्टाध्यायीसूत्रपाठः, शारदासंस्कृतसंस्थानम्।

दीक्षितः, भट्टोजिदीक्षितः (सन् १९९७), प्रौढमनोरमा, ज्योतिषप्रकाशप्रेस।

पाण्डेयः, रमाकान्तः (सन् २०१२), प्रौढमनोरमा. चौखम्बासुरभारतीप्रकाशनम्।

मिश्रः, विश्वनाथः. (सन् २०१७), लघुशब्देन्दुशेखरः, चौखम्बा–सुरभारती–प्रकाशनम्।

शास्त्री, अशोकचन्द्रः. (२०५५), संस्कृतव्याकरणशास्त्रेतिहासविमर्शः, भारतीय–विद्या–संस्थानम्।

शर्मा, गिरिराजः. (सन् २०१२), वैयाकरणसिद्धान्तकौमुदी, मोतिलालवनारसीदासः।

शास्त्री, तात्या. (सन् २०१२), परिभाषेन्दुशेखरः (भूतितिलकटीका), चौखम्बासुरभारतीप्रकाशनम्।

Joshi-Ranade, S. (2020). Asiddha principle and Ābhīya Asiddhatva in computational linguistics. IIT Bombay via Scribd. scribd.com.

Krishnapur, Soumya. (2021). Fundamentals of Asiddhatva in Paninian grammar. Vyoma Sanskrit from Home. sanskritfromhome.org.

Roodbergen, J. A. F. (2008). Dictionary of Paninian grammatical terminology. Bhandarkar Oriental Research Institute/Internet Archive. archive.org.

Sulich, Małgorzata. (2015). Asiddha vs asiddhavat in Patanjali's Mahabhasya. Jagiellonian University via Academia. academia.edu.